त्रिवेन्द्रम संस्कृत सीरीज, त्रिवेन्द्रम

श्रीनारायणप्रणीतः

# तन्त्रसमुच्चयः

शङ्करप्रणीतया विमर्शिन्याख्यया व्याख्यया समेतः

सम्पादक :

महामहोपाध्यायेन त. गणपति शास्त्रिणा

संशोधित

With an elaborate Introduction by :

Prof. N.P. UNNI


राष्ट्रिय-संस्कृत-संस्थानम्

मानित विश्वविद्यालय, नई दिल्ली-११००५८

# आमुखम्

*अभ्युदयनिश्श्रेयसे आगम* इति *सिद्धये इहपरप्रयोजनानाम् आगम* इति च संविदितमेव समेषाम्। येनोपायेन निश्श्रेयसाधिगमः स आगम इति वेदराशिं शास्त्रविशेषञ्च निर्दिशति आगमशब्दः। त इमे आगमाः सर्वसाधारणोपयोगिनः सन्तोऽपि देवपूजादिमन्त्रतन्त्रविधायक-नियमनाच्छास्त्रत्वं प्रपद्यन्ते। देशविशेषानुगुणं स्वस्वशिष्याणामुपकाराय प्रागाचार्यैः यथाकालम् तत्तदागमेभ्यः यथाप्रसङ्गानुकूलं विषयान् माधुकरीवृत्त्या सङ्गृह्य समुचिताभिधानेन ग्रन्थरत्नानि व्यरचिषत। इमे चागमग्रन्थाः श्रुति-स्मृति-पुराणेतिहास-धर्मशास्त्रादिविविधशास्त्रमर्यादा-नुरक्षका अक्षुण्णं लोकवेदकर्मानुष्ठानप्रबोधिनः सनातनधर्मसंरक्षणशीला राजन्तेऽत एव प्रामाणिकास्सर्वादृताश्च।

तमिमं पन्थानमनुसरन् केरलेषु प्राप्तजनिः ख्यातनामा **नारायणो** धर्मशास्त्रवित् ४५२९ तमे कल्यब्दे (१४२६ खीष्टाब्दे) विविधागमान् निर्मथ्य अधीतिबोधाचरणक्रमेण कृतबुद्धानुष्ठानैः समवाप्तागमतन्त्रः प्रचारसिद्धये ***तन्त्रसमुच्चय*** इति ग्रन्थं चकार लोकोपकाराय। तद्वक्ति पुष्पिकायां स्वयं यथा -

कल्यब्देष्वतियत्सु नन्दनवनेष्वम्भोधिसङ्ख्येषु यः
सम्भूतो भृगुवीतहव्यमुनियुङ्मूले सवेदोन्वये।
प्राहुर्यस्य जयन्तमङ्गलपदेद्धं धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद्बहुविधादुद्धृत्य तन्त्रार्णवात्।।इति।

ग्रन्थोऽयं न केवलं देवपूजामात्रशासनपरः अपि तु उत्कृष्ट-शिल्पशास्त्रसिद्धान्तानां प्रामाणिकप्रस्तोता चेति वैशिष्ट्यम्।

ग्रन्थातिशयतां प्रामाणिकताञ्च वीक्ष्यैव लोकोपकारदृष्टयः महामहोपाध्यायाः **टी. गणपतिशास्त्रिणः** मलयाललिपिमातृकाष्षड् आधृत्य महता श्रमेणानुसन्धाय प्रतिमातृकम् अक्षरशः अनुशील्य

# PREFACE.

The Tantrasamuchchaya is a collection of subjects dealing with the rituals of consecration, daily worship, festivals and other kindred matters of the deities in temples which are elaborately explained in the ancient original Tantric literature. It is now accepted as the highest authority in the Kerala countries on matters connected with the temple worship. But the work presents difficulties in the way of many who wish to study it; namely, copies of the work are rarely accessible, and the text, dealing as it does with recondite subjects stands in need of a commentary. To remove these difficulties, the work is now published along with a commentary.

The author of this work is called Nârâyana a member of the Jayantamangala N. Travancore (Chennassu manakkal) who lived in the Kali year 4529 corresponding to 1426 A. D., as is evident from the Sloka at the end of the work,

"कल्यब्देष्वतियत्सु नन्दनयनेष्वम्भोधिसंख्येषु (४५२९) यः
संभूतो भृगुवीतहव्यमुनियुङ्मूले सवेदोन्वये ।
प्राहुर्यस्य जयन्तमङ्गलपदेद्धं धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद् बहुविधादुद्धृत्य तन्त्रार्णवात् ॥"

The commentary Vimarsini was written by Sankara who was the son of the author of the text as is clear from the Sloka,

"यस्य हि तन्त्रसमुच्चयरचनाल्लोके समुत्थिता कीर्तिः ।
तत्पुत्रेण कृतेयं शङ्करनाम्ना विमर्शिनी व्याख्या ॥"

The work consists of 12 Patalas of which the first six are now given to the public as the first part, and the other six Patalas will also be published ere long as the second part.

The edition of the text is based on the following manuscripts:—

1. (क) Obtained from the Palace Library.
2. (ख) Lent by Mr. Kailasapuram Govinda Pisharoti.
3. (ग) Do. Mr. Krishnan Tantri, Thazhaman Matham.
4. (घ) Do. Mr. Sivan Potti, Munchira.

**तीर्थान्ते तटिनीतटे जलनिधेस्तीरे सरित्सङ्गमे**
**शैलाग्रेऽद्रितटे वनोपवनयोरुद्यानदेशे तथा ।**
**सिद्धाद्यायतनेषु वा गुरुवरो ग्रामे पुरे पत्तने**
**देशेऽन्यत्र मनोरमे सुरसमिज्यायै क्षितिं कल्पयेत् ॥**
**प्राचि प्रतीचि च हरौ निजदिश्युमेशे**
**वायौ निसुम्भजिति तारकजित्युदीच्याम् ।**
**ग्रामादिकेषु निर्ऋतौ गणपार्यनाम्नो-**
**र्गृह्णातु भूमिमखिलेष्वपि मध्यतो वा ॥ २९ ॥**
**गोमर्त्यैः फलपुष्पदुग्धतरुभिश्चाढ्या समा प्राक्प्लवा**
**स्निग्धा धीररवा प्रदक्षिणजलोपेताशुबीजोद्गमा ।**

---

सर्वदेवानां सामान्येन प्रतिष्ठास्थानान्याह — तीर्थान्त इति । तीर्थान्ते तीर्थसमीपे । तटिनीतटे नदीतीरे । जलनिधेस्तीरे, जलनिधिः समुद्रः तस्य तीरे । सरित्सङ्गमे नद्योर्मिथः सङ्गमे नदीसमुद्रसङ्गमे च । शैलाग्रे पर्वतोपरिभागे । अद्रितटे पर्वतस्य पार्श्वप्रदेशे । वनोपवनयोः वने उपवने च । उपवनं ग्रामसमीपस्थारण्यम् । उद्यानदेशे उद्यानं कृत्रिमोपवनम् । वातथाशब्दौ विकल्पद्योतकौ । सिद्धाद्यायतनेषु, सिद्धास्तपआदिभिः कृतकृत्याः, तेषां तादृशानामन्येषां चायतनेष्वाश्रयस्थानेषु । ग्रामे विप्रसमूहस्यावासे । पुरे राजधान्याः समीपे । पत्तने नगराभ्याशे । अन्यत्र मनोरमे च देशे । गुरुवरः सुरसमिज्यायै देवप्रतिष्ठाविधये क्षितिं कल्पयेत् । अत्र पूर्वपूर्वोक्तानि स्थानानि श्रेष्ठानीत्यवगन्तव्यम् ॥ २८ ॥

अथ ग्रामे पुरे पत्तन इत्युक्तेषु ग्रामादिकेषु विष्ण्वादीनां देवानां स्थाननियममाह — **प्राचीति** । हरौ ग्रामादिकेषु प्राचि प्राग्भागे प्रतीचि च प्रत्यग्भागे भूमिं गृह्णातु । उमेशे शिवे निजदिशि ईशभागे । निसुम्भजिति दुर्गायां वायौ वायुभागे । तारकजिति स्कन्दे उदीच्याम् उदग्भागे । गणपार्यनाम्नोः गणपतौ शास्तरि च निर्ऋतौ निर्ऋतिभागे । अखिलेषु विष्ण्वादिसप्तस्वपि मध्यतो वा मध्यभागे वा ॥ २९ ॥

अथ भूमेरुत्तमादित्वमाश्रित्य भेदमाह — **गोमर्त्यैरिति** । गोभिर्मर्त्यैश्चाढ्या आश्रिता । फलपुष्पदुग्धतरुभिः फलवद्भिः पुष्पवद्भिः क्षीरवद्भिश्च वृक्षैराढ्या पूर्णा । समा निम्नोन्नतवर्जिता । प्राक्प्लवा प्राग्भागनिम्ना । स्निग्धा